# आदर्श-प्रश्नपत्रम् - 3, 2021-22

## द्वितीयं सत्रम्

## कक्षा - दशमी

## संस्कृतम् (कोड-122)

**समयः – होराद्वयम्** **सम्पूर्णाङ्काः – 40**

**सामान्यनिर्देशाः–**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 प्रश्नाः सन्ति।
2. अस्य प्रश्नपत्रस्य पठनाय 20 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
4. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् एव लेखनीया।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

### वर्णनात्मकाः प्रश्नाः ( अङ्काः 40 )

### अपठितावबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **( 10 )**

एकस्मिन् ग्रामे मन्थरको नाम तन्तुवायः अवसत्। तन्तु संयोजनं कुर्वतः तस्य सर्वाणि उपकरणानि नष्टानि। अथ सः नवीनानि उपकरणानि निर्मातुं काष्ठानि प्राप्तुं वनगमच्छत्। तत्र एकम् विशालं वृक्षं दृष्ट्वा यावत् सः तस्योपरि कुठाराघातं कर्तुम् उद्यतोऽभवत् तावदेव तद्वृक्षवासी यक्षः अवदत्– "भो! अयं पादपः मम आश्रयः, एनं मा कर्तय। अहम् तव मनोकामना पूरयिष्यामि, अभीष्टं वरं प्रार्थय इति।"

एतत् श्रुत्वा तन्तुवायः स्वपत्नीं प्रष्टुम् गृहमागच्छत्। सा तम् अन्यत् बाहुयुगलम् द्वितीयं च शिरं याचितुम् प्रेरितवती येन सः पुरतः पृष्ठतः च पटान् निर्मातुं समर्थो भवेत्। ततः मन्थरकः वनं गत्वा यक्षं अन्यद् बाहुं द्वितीयं शिरः याचितवान्। यक्षः अपि तस्मै तादृशम् वरम् दत्तवान्। अनन्तरम् यावत् सः चतुर्भुजः द्विशिरः भूत्वा गृहमागतवान् तावत् सर्वे तम् राक्षसं मत्वा तस्य वधम् अकुर्वन्।

**(अ) एकपदेन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 1 × 2 = 2 )**

(*i*) तन्तुवायः कुत्र अवसत्?

(*ii*) तन्तुवायः काम् प्रष्टुम् गृहम् आगच्छत्?

(*iii*) सर्वे किम् मत्वा मन्थरकस्य वधम् अकुर्वन्?

**उत्तराणि–** (*i*) एकस्मिन् ग्रामे (*ii*) स्वपत्नीम् (*iii*) राक्षसम्

**(आ) पूर्णवाक्येन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 2 × 2 = 4 )**

(*i*) मन्थरकः किमर्थम् वनम् अगच्छत्?

(*ii*) वृक्षवासी यक्षः तन्तुवायम् किम् अवदत्?

(*iii*) तन्तुवायस्य पत्नी तन्तुवायम् किम् याचितुं प्रेरितवती?

**उत्तराणि–** (*i*) सः नवीनानि उपकरणानि निर्मातुं काष्ठानि प्राप्तुं वनं अगच्छत्।

(*ii*) वृक्षवासी यक्षः अवदत् 'भो अयं पादपः मम आश्रयः, एनं या कर्तय'।

(*iii*) तन्तुवायस्य भार्या अन्यत् बाहुयुगलं द्वितीयं च शिरं याचितुं प्रेरितवती।

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **( 1 )**

**उत्तरम्–** मूर्खः तन्तुवायः/मूर्खा भार्या/सहसा क्रियां न विदधीत/लोभस्य परिणामः।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ई) **यथानिर्देशम् उत्तरत– ( केवलं प्रश्नत्रयम् )** **( 1 × 3 = 3 )**

(*i*) तस्य सर्वाणि उपकरणानि नष्टानि। अत्र विशेष्यपदं किम्?

(*ii*) सा तम् अन्यत् बाहुयुगलम् ...। अत्र 'सा' पदम् कस्यै प्रयुक्तम्?

(*iii*) 'दत्तवान्' क्रियापदस्य कर्तृपदं गद्यांशात् चित्वा लिखत।

(*iv*) गद्यांशे प्रयुक्तं अत्र 'पटान्' इति पदस्य कः अर्थः?

**उत्तराणि–** (*i*) उपकरणानि (*ii*) पत्न्यै (*iii*) यक्षः (*iv*) वस्त्राणि

## रचनात्मकं कार्यम्

**2. पितामहं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु।** **( ½ × 10 = 5 )**

छात्रावासतः

परमपूज्याः पितामहमहोदयाः!

श्रीमत्-चरणकमलेषु सविनयं प्रणामाः

भवतां पत्रं गतदिने मया (*i*) ...................। पत्रं लब्ध्वा पठित्वा च महान् (*ii*) ................... जातः। अत्र भवत्कृपया अहं सर्वथा कुशली (*iii*) ............... अस्मि। अध्ययनम् अपि मम (*iv*) ..................... प्रचलति। अहं प्रथमश्रेण्याम् उत्तीर्णः इति (*v*) ............... ज्ञात्वा भवता महती प्रसन्नता प्रकटीकृता पत्रे। परं इदं भवच्चरणकमलयोः एव कृपया फलं वर्तते। (*vi*) ...............शुभाशीर्वचनैश्च अहं पुनरपि परीक्षासु प्रथमश्रेणीं (*vii*) ............... । काले-काले पत्रप्रदानेन (*viii*) ............... मार्गदर्शनेन (*ix*) ............... दोषाणाम् निरूपणेन च अहं (*x*) ...............अनुग्राह्यः इति पुनः प्रणतिपूर्वकं प्रणामाः।

भवदङ्कपालितः पौत्रः

कखग

**मञ्जूषा–** सर्वदा, शुभाशीर्वादैः, प्राप्स्यामि, मम, प्रमोदो, समाचारं, प्राप्तम्, भवताम्, सम्यक्, सानन्दश्च

**उत्तराणि–** (*i*) प्राप्तम् (*ii*) प्रमोदो (*iii*) सानन्दश्च (*iv*) सम्यक् (*v*) समाचारं
(*vi*) शुभाशीर्वादैः (*vii*) प्राप्स्यामि (*viii*) भवताम् (*ix*) मम (*x*) सर्वदा

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** **( 1 × 5 = 5 )**



Get More Learning Materials Here : CLICK HERE www.studentbro.in

**मञ्जूषा–** छात्रा:, क्षेत्रे, वृक्षारोपणम्, वनमहोत्सव: पर्यावरणम्, शिक्षकै:, पादपानाम्, रोपणम्, पादपान्, उत्साहपूर्वकम्, अनेके वृक्षा:, विशालम्

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत–** **(1 × 5 = 5)**

**''स्वास्थ्यम्''**

**मञ्जूषा–** प्रतिदिनं, सर्वोत्तमं धनम्, सूर्योदय:, संतुलित-आहार:, नियमित, व्यायाम:, स्वास्थ्यं, स्वास्थ्यवर्धकं, प्राक्, पौष्टिकं भोजनम्

**उत्तराणि–** (*i*) अस्मिन् चित्रे वनमहोत्सवस्य दृश्यम् अस्ति।

(*ii*) विद्यालयस्य प्राङ्गणे छात्रा: वृक्षारोपणम् कुर्वन्ति।

(*iii*) पादपान् रोपयित्वा एका बालिका पर्यावरणगीतं गायति।

(*iv*) सर्वे छात्रा: उत्साहपूर्वकं वनमहोत्सवम् आचरन्ति।

(*v*) क्षेत्रे अनेके हरिता: वृक्षा: सन्ति।

**अथवा**

(*i*) स्वास्थ्यं स्वस्थजीवनस्य आधारस्तम्भ: अस्ति।

(*ii*) स्वास्थ्यस्य रक्षायै स्वास्थ्यसंबंधी नियमान् पालयेयु:।

(*iii*) प्रतिदिनं प्रात: व्यायामं कुर्यात्।

(*iv*) सन्तुलितं भोजनं कुर्यात्।

(*v*) सर्वेषु धनेषु स्वास्थ्यमेव सर्वोत्तमं धनम् अस्ति।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** **(1 × 5 = 5)**

(*i*) भारत नदियों का देश है। (India is country of Rivers.)

(*ii*) अरुणाचल प्रदेश की राजधानी इटानगर है। (Capital of Arunachal Pradesh is Itanagar.)

(*iii*) सदाचार मनुष्य का पहला धर्म होना चाहिए। (Virtue should be Man's first religion.)

(*iv*) सज्जन व्यक्ति सदैव परोपकार करते हैं। (Gentleman always do charity.)

(*v*) माता और पिता अपने बच्चों का मार्गदर्शन करते हैं। (Parents always guide their children.)

(*vi*) जीवन में एक ही लक्ष्य होना चाहिए। (There should be only one goal in life.)

(*vii*) पिता के साथ पुत्र जाता है। (Son goes with Father.)

**उत्तराणि–**

(*i*) भारतम् नदीनाम् देश: अस्ति।

(*ii*) अरुणाचलप्रदेशस्य राजधानी इटानगरम् अस्ति।

(*iii*) सदाचार: मनुष्याणां प्रथम: धर्म: भवेत्।

(*iv*) सज्जना: सदैव परोपकारं कुर्वन्ति।

(*v*) पितरौ स्वसन्तते:/शिशूनाम् मार्गदर्शनं कुरुत:।

(*vi*) जीवने एकमेव लक्ष्यं भवेत्।

(*vii*) पित्रा सह पुत्र: गच्छति।

## पठितावबोधनम्

**5. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **(3)**

(वनस्य दृश्यम् समीपे एवैका नदी अपि वहति।) एक: सिंह: सुखेन विश्राम्यते तदैव एक: वानर: आगत्य तस्य पुच्छं धुनोति। क्रुद्ध: सिंह: तम् प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारुढ़:। तदैव अन्यस्यात् वृक्षात् अपर: वानर: सिंहस्य कर्णमाकृष्य पुन: वृक्षोपरि आरोहति। एवमेव वानरा: वारं-वारं सिंहं तुदन्ति। क्रुद्ध: सिंह: इतस्तत: धावति, गर्जति परं किमपि कर्तुम् समर्थ: न तिष्ठति। वानरा: हसन्ति वृक्षोपरि च विविधा: पक्षिण: अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(अ) एकपदेन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( ½ × 2 = 1 )**

(*i*) कस्य समीपे नदी वहति?

(*ii*) के हसन्ति?

(*iii*) पक्षिण: कीदृशम् कलरवं कुर्वन्ति?

**उत्तराणि–** (*i*) वनस्य

(*ii*) वानरा:

(*iii*) हर्षमिश्रितं

**(आ) पूर्णवाक्येन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 1 × 2 = 2 )**

(*i*) पक्षिण: सिंहस्य दशां दृष्ट्वा किम् कुर्वन्ति?

(*ii*) क्रुद्ध: सिंह: किं करोति?

(*iii*) वानरा: वारं-वारं कं तुदन्ति?

**उत्तराणि–** (*i*) पक्षिण: अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।

(*ii*) क्रुद्ध: सिंह: इतस्तत: धावति, गर्जति परं किमपि कर्तुम् समर्थ: न तिष्ठति।

(*iii*) वानरा: वारं-वारं सिंहं तुदन्ति।

**6. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **( 3 )**

**आलस्यं हि मनुष्याणाम् शरीरस्थो महान् रिपु:।**
**नास्त्युद्यमसमो बन्धु: कृत्वा यं नावसीदति॥**

**(अ) एकपदेन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( ½ × 2 = 1 )**

(*i*) अस्माकम् रिपु: क: अस्ति?

(*ii*) आलस्यं केषाम् शरीरे स्थित:?

(*iii*) केन सम: बन्धु: नास्ति?

**उत्तराणि–** (*i*) आलस्यं

(*ii*) मनुष्याणाम्

(*iii*) उद्यमेन

**(आ) पूर्णवाक्येन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 1 × 2 = 2 )**

(*i*) किं कृत्वा मनुष्य: न अवसीदति?

(*ii*) आलस्यं केषाम् शरीरे निवसति?

(*iii*) नाराणाम् बन्धु: क: अस्ति?

**उत्तराणि–** (*i*) उद्यमं कृत्वा मनुष्य: न अवसीदति।

(*ii*) आलस्यं मनुष्याणाम् शरीरे निवसति।

(*iii*) नराणाम् बन्धु: उद्यम: भवति।

**7. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **( 3 )**

**मयूर:** को न जानाति तव ध्यानावस्थाम्। 'स्थितप्रज्ञ' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्। तव

Get More Learning Materials Here : CLICK HERE www.studentbro.in

कारणात् तु सर्वम् पक्षिकुलमेवावमानितम् जातम्।

**वानरः** (सगर्वम्) अतएव कथयामि यत् अहमेव योग्यः वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः।

**मयूरः** अरे वानर! तूष्णीम् भव। कथं त्वं योग्यः वनराजपदाय? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः अतः वने निवसन्तं माम् वनराजरूपेणापि द्रष्टुं सज्जाः भवन्तु अधुना यतः कथं कोऽप्यन्यः विधातुः निर्णयम् अन्यथा कर्तुम् क्षमः, मम सौन्दर्यम् अपूर्वम्।

**काकः** (सव्यङ्ग्यम्) अरे अहिभुक्। नृत्यातिरिक्तं का तव विशेषता यत् त्वाम् वनराजपदाय योग्यं मन्यामहे वयम्।

**(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)** **(½ × 2 = 1)**

(*i*) को न जानाति तव ध्यानावस्थाम् इति कः कथयति?

(*ii*) कस्य सौन्दर्यम् अपूर्वम् अस्ति?

(*iii*) कः पक्षीकुलम् अपमानितम् अकरोत्?

**उत्तराणि–** (*i*) मयूरः

(*ii*) मयूरस्य

(*iii*) बकः

**(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)** **(1× 2 = 2)**

(*i*) काकः किम् कथयित्वा मयूरं भर्त्सयति?

(*ii*) विधात्रा मयूरः पक्षिराजः किमर्थम् कृतः?

(*iii*) वानरः किमर्थम् वन्यजीवान् तत्पराः भवितुम् कथयति?

**उत्तराणि–** (*i*) नृत्यातिरिक्तं का तव विशेषता इति कथयित्वा काकः मयूरं भर्त्सयति।

(*ii*) मयूरस्य शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव मयूरं पक्षिराजः कृतः।

(*iii*) वानरः स्वयं वनराजपदाय योग्यः मत्वा स्वस्य राज्याभिषेकाय वन्यजीवान् तत्पराः भवितुं कथयति।

**8. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत–** **(½ × 4 = 2)**

**विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।**
**अश्वश्चेद् धावने वीरः भारस्य वहने खरः॥**

**अन्वयः–** विचित्रे (*i*) .................... खलु किञ्चित् (*ii*) .................. नास्ति। अश्वः चेत् (*iii*) .................... वीरः (तर्हि) भारस्य वहने (*iv*) .................... (वीरः) अस्ति।

**मञ्जूषा–** निरर्थकम्, खरः, धावने, संसारे

**उत्तराणि–** (*i*) संसारे (*ii*) निरर्थकम् (*iii*) धावने (*iv*) खरः

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–** **(½× 4 = 2)**

**काकः कृष्णः पिकः कृष्णः को भेदः पिक-काकयोः।**
**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥**

**भावार्थः–** अस्य भावोऽस्ति यत् (*i*) .................... वर्णः कृष्णः वर्तते पिकस्य अपि वर्णः (*ii*) ............... एव अस्ति। अतः तयोः पिके काके च कः भेदः अस्ति। वर्णदृष्ट्या काक-पिकयोः कश्चिद् भेदः न दृश्यते परन्तु यदा (*iii*) .................... समयः आगच्छति तदा तयोः स्वरैः ज्ञायते यत् कः (*iv*) .................... अस्ति कश्च पिको वर्तते।

**मञ्जूषा–** काकस्य, वसन्तस्य, काकः, कृष्णः

**उत्तराणि–** (*i*) काकस्य (*ii*) कृष्णः (*iii*) वसन्तस्य (*iv*) काकः

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**9. अधोलिखितं कथांशं समुचितक्रमेण लिखत–** **( ½ × 8 = 4 )**

(*i*) सिंहः क्रोधेन गर्जति अहम् वनराजः अस्मि।

(*ii*) बकः कथयति अहम् अविचलः, ध्यानमग्नः अहं योग्यः।

(*iii*) वानरः कथयति राजा तु रक्षकः भवति।

(*iv*) सिंहस्य दुरवस्थाम् दृष्ट्वा सर्वे जीवाः हसन्ति।

(*v*) मयूरः कथयति मम पिच्छानाम् अपूर्वं सौन्दर्यम् अतः अहम् योग्यः।

(*vi*) ततः काकः प्रवेशं कृत्वा कथयति अहम् एव योग्यः।

(*vii*) पिकः कथयति अहम् मधुभाषिणी अतः अहं योग्यः।

(*viii*) गजः कथयति अहं विशालकायः बलशाली पराक्रमी अतः अहम् योग्यः अस्मि।

**उत्तराणि–**

(*i*) सिंहस्य दुरवस्थाम् दृष्ट्वा सर्वे जीवाः हसन्ति।

(*ii*) सिंहः क्रोधेन गर्जति अहम् वनराजः अस्मि।

(*iii*) वानरः कथयति राजा तु रक्षकः भवति।

(*iv*) ततः काकः प्रवेशं कृत्वा कथयति अहम् एव योग्यः।

(*v*) पिकः कथयति अहम् मधुभाषिणी अतः अहं योग्यः।

(*vi*) गजः कथयति अहं विशालकायः बलशाली पराक्रमी अतः अहम् योग्यः अस्मि।

(*vii*) बकः कथयति अहम् अविचलः, ध्यानमग्नः अहं योग्यः।

(*viii*) मयूरः कथयति मम पिच्छानाम् अपूर्वं सौन्दर्यम् अतः अहम् योग्यः।

Get More Learning Materials Here : CLICK HERE www.studentbro.in